www.shaivam.org

# શ્રી વિશ્વનાથ સુપ્રભાતમ

ઉત્તિષ્ટ ભૈરવસ્વામિન કાશિકાપુરપાલક ।
શ્રીવિશ્વનાથભક્તાનાં સંપૂરય મનોરથમ ।। ૧ ।।
સ્નાનાય ગાઙ્ગસલિલેઽથ સમર્ચનાય વિશ્વેશ્વરસ્ય બહુભક્તજના ઉપેતાઃ ।
શ્રીકાલભૈરવ લસન્તિ ભવન્નિદેશં ઉત્તિષ્ટ દર્શય દશાં તવ સુપ્રભાતમ ।। ૨
યાગવ્રતાદિબહુપુણ્યવશં યથા ત્વં પાપાત્મનામપિ તથા સુગતિપ્રદાઽસિ ।
કારુણ્યપૂરમયિ શૈલસુતાસપત્નિ માતર્ભગીરથસુતે તવ સુપ્રબ્ભાતમ ।। ૩
દુગ્ધપ્રવાહકમનીયતરઙ્ગભઙ્ગે પુણ્યપ્રવાહપરિપાથિતભક્તસઙ્ઘે ।
નિત્યં તપસ્વિજનસેવિતપાદપદ્મે ગઙ્ગે શરણ્યશિવદે તવ સુપ્રભાતમ ।। ૪ ।
વારાણસીસ્થિતગજાનન દુણ્ઠિરાજ સંપ્રાર્થિતેષ્ટફલદાનસમર્થમૂર્તે ।
ઉત્તિષ્ટ વિઘ્નવિરહાય ભજામહે ત્વાં શ્રીપાર્વતીતનય ભોસ્તવ સુપ્રભાતમ ।।
પૂજાસ્પદ પ્રથમમેવ સુરેશુ મધ્યે સંપૂરણે કુશલ ભક્તમનોરથાનામ ।
ગીર્વાણબૃન્દપરિપૂજિતપાદપદ્મ સંજાયતાં ગણપતે તવ સુપ્રભાતમ ।। ૬ ।।
કાત્યાયનિ પ્રમથનાથશરીરભાગે ભક્તાલિગીતમુખરીકૃતપાદપદ્મે ।
બ્રહ્માદિદેવગણવન્દિતદિવ્યશૌર્યે શ્રીવિશ્વનાથદયિતે તવ સુપ્રભાતમ ।। ૭ ।
પ્રાતઃ પ્રસીદ વિમલે કમલાયતાક્ષિ કારુણ્યપૂર્ણહૃદયે નમતાં શરણ્યે ।
નિર્ધૂતપાપનિચયે સુરપૂજિતાઙ્ઘ્રે શ્રીવિશ્વનાથદયિતે તવ સુપ્રભાતમ ।। ૮
સસ્યાનુકૂલજલવર્ષણકાર્યહેતોઃ શાકમ્ભરીતિ તવ નામ ભુવિ પ્રસિદ્ધમ ।
સસ્યાતિજાતમિહ શુષ્યતિ ચાન્નપૂર્ણે ઉત્તિષ્ટ સર્વફલદે તવ સુપ્રભાતમ ।।
સર્વોત્તમં માનવજન્મ લબ્ધ્વા હિનસ્તિ જીવાન ભુવિ મર્ત્યવર્ગઃ ।
તદ્વારણાયાશુ જહીહિ નિદ્રાં દેવ્યન્નપૂર્ણે તવ સુપ્રભાતમ ।।૧૦।
શ્રીકણ્ઠ કણ્ઠધૃતપન્નગ નીલકણ્ઠ સોત્કણ્ઠભક્તનિવહોપહિતોપકણ્ઠ ।
ઉત્તિષ્ટ સર્વજનમઙ્ગલસાધનાય વિશ્વપ્રજાપ્રથિતભદ્ર જહીહિ નિદ્રામ ।। ૧૧
ગઙ્ગાધરાદ્રિતનયાપ્રિય શાન્તમૂર્તે વેદાન્તવેદ્ય સકલેશ્વર વિશ્વમૂર્તે ।
કૂટસ્થનિત્ય નિખિલાગમગીતકીર્તે દેવાસુરાર્ચિત વિભો તવ સુપ્રભાતમ ।।

શ્રીવિશ્વનાથકરુણામૃતપૂર્ણસિન્ધો શીતાંશુખણ્ડસમલંકૃતભવ્યચૂડ ।
ભસ્માઙ્ગરાગપરિશોભિતસર્વદેહ વારાણસીપુરપતે તવ સુપ્રભાતમ ।। ૧૩ ।
દેવાદિદેવ ત્રિપુરાન્તક દિવ્યભાવ ગઙ્ગાધર પ્રમથવન્દિત સુન્દરાઙ્ગ ।
નાગેન્દ્રહાર નતભક્તભયાપહાર વારાણસીપુરપતે તવ સુપ્રભાતમ ।। ૧૪ ।।
વેદાન્તશાસ્ત્રવિશદીકૃતદિવ્યમૂર્તે પ્રત્યૂષકાલમુનિપુઙ્ગવગીતકીર્તે ।
ત્વય્યર્પિતાર્જિતસમસ્તસુરક્ષણસ્ય વારાણસીપુરપતે તવ સુપ્રભાતમ ।। ૧૫
કૈલાસવાસમુનિસેવિતપાદપદ્મ ગઙ્ગાજલૌઘપરિષિક્તજટાકલાપ ।
વાચામગોચરવિભો જટિલત્રિનેત્ર વારાણસીપુરપતે તવ સુપ્રભાતમ ।। ૧૬ ।
શ્રીપાર્વતીહૃદયવલ્લભ પચવક્ત્ર શ્રીનીલકણ્ઠ નૃકપાલકલાપમાલ ।
શ્રીવિશ્વનાથમૃદુપઙ્કજમજુપાદ શ્રીકાશિકાપુરપતે તવ સુપ્રભાતમ ।। ૧૭ ।।
કાશી ત્રિતાપહરણી શિવસદ્મભૂતા શર્મેશ્વરી ત્રિજગતાં સુપુરીષુ હૃદ્યા ।
વિદ્યાકલાસુ નવકૌશલદાનશીલા શ્રીકાશિકાપુરપતે તવ સુપ્રભાતમ ।। ૧૮
શ્રીવિશ્વનાથ તવ પાદયુગં સ્મરામિ ગઙ્ગામઘાપહરણીં શિરસા નમામિ ।
વાચં તવૈવ યશસાઽનઘ ભૂષયામિ વારાણસીપુરપતે તવ સુપ્રભાતમ ।। ૧
નારીનતેશ્વરયુતં નિજચારુરૂપં સ્ત્રીગૌરવં જગતિ વર્ધયિતું તનોષિ ।
ગઙ્ગાં હિ ધારયસિ મૂર્ધ્નિ તથૈવ દેવ વારાણસીપુરપતે તવ સુપ્રભાતમ ।।
ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવદેવ ।। *
ઓમ મઙ્ગલં ભગવાન શમ્ભો મઙ્ગલમ ષભધ્વજ ।
મઙ્ગલં પાર્વતીનાથ મઙ્ગલં ભક્તવત્સલ ।। *

* એતત શ્લોકદ્વયં પ્રાચીનકવિતમ ।

www.shaivam.org